"एकदोषोत्थितः साध्यः कृच्छ्रसाध्यो द्विदोषजः ।
सर्व्वरूपान्वितो घोरो ह्यसाध्यो भूर्य्युपद्रवः ॥"
अथ विस्फोटस्य चिकित्सा ।
"विस्फोटे लङ्घनं कार्य्यं वमनं पथ्यभोजनम् ।
यथादोषबलं वीक्ष्य प्रयुञ्ज्याच्च विरेचनम् ॥*॥
जीर्णाः शालियवा मुद्गा मसूराश्चाढ़की तथा ।
एतान्यन्नानि विस्फोटे हितानि मुनयोऽब्रुवन् ॥
द्वे पञ्चमूल्यौ रास्ना च दार्व्वुशीरं दुरालभा ।
गुडूची धान्यकं मुस्तमेषां क्वाथं पिबेन्नरः ।
विस्फोटान्नाशयत्याशु समीरणनिमित्तकान् ॥
द्राक्षाकाश्मर्य्यखर्ज्जूरपटोलारिष्टवासकैः ।
कटुकालाजदुःस्पर्शैः पैत्तिके क्वथितं शृतम् ॥
भूनिम्बवचावासात्रिफलेन्द्रयवत्सकैः ।
पिचुमर्द्दपटोलाभ्यां कफजे मधुयुक् शृतम् ॥*॥
किराततिक्तकारिष्टयष्ट्याह्वामुस्तवासकैः ।
पटोलपर्पटोशीरत्रिफलाकोटजान्वितैः ॥
क्वथितैर्द्वादशाङ्गन्तु सर्व्वविस्फोटनाशनम् ॥*॥
विस्फोटव्याधिनाशाय तण्डुलाम्बुप्रपेषितैः ।
बीजैः कुटजवृक्षस्य लेपः कार्य्यो विजानता ॥*
छिन्ना पटोलभूनिम्बवासकारिष्टपर्पटैः ।
खदिराब्दयुतैः क्वाथो हन्ति विस्फोटकं ज्वरम् ॥
चन्दनं नागपुष्पञ्च सारिवा तण्डुलीयकम् ।
शिरीषवल्कलं जाती लेपः स्याद्दाहनाशनः ॥"
"उत्पलं चन्दनं लोध्रमुशीरं सारिवाद्वयम् ।
जलेन पिष्टं लेपेन स्फोटदाहार्त्तिनाशनम् ॥*॥
पुत्त्रजीवस्य मज्जानं जले पिष्ट्वा प्रलेपयेत् ।
कालस्फोटं विषस्फोटं सद्यो हन्यात् सवेदनम् ॥
कक्षाग्रन्थिं गलग्रन्थिं कर्णग्रन्थिञ्च नाशयेत् ।
अन्यञ्च स्फोटकं ताम्रं पुत्त्रजीवो विनाशयेत् ॥"
इति विस्फोटकाधिकारः । इति भावप्रकाशः ॥
अन्यच्च ।
"मरीचं त्रिवृतं कुष्ठं हरितालं मनःशिला ।
देवदारु हरिद्रे द्वे कुष्ठं मांसी च चन्दनम् ।
विशाला करवीरञ्च अर्कक्षीरं सकृत्फलम् ।
एषाञ्च कार्षिको भागो विषस्यार्द्धपलं भवेत् ॥
प्रस्थं कटुकतैलस्य गोमूत्रेऽष्टगुणे पचेत् ।
मृत्पात्रे लौहपात्रे वा शनैर्मृद्वग्निना पचेत् ॥
पामा विचर्च्चिका चैव दद्रुविस्फोटकानि च ।
अभ्यङ्गेन प्रशाम्यन्ति कोमलत्वञ्च जायते ॥
प्रसूतान्यपि श्वित्राणि तैलेनानेन लेपयेत् ।
चिरोत्थितमपि श्वित्रं विवर्णं तत्क्षणात् भवेत् ॥"
अपि च ।
"भूनिम्बनिम्बत्रिफलापर्पटैश्च शृतं जलम् ।
पटोलमुस्तकाभ्याञ्च वासकेन च नाशयेत् ।
विस्फोटकानि रक्तानि नात्र कार्य्या विचारणा ॥"
इति गारुड़े १६८ अध्यायः ॥*॥
विस्फोटकस्य स्वरूपं यथा, भावप्रकाशे ।
"स्फोटाः श्यावारुणाभासा विस्फोटाः स्युस्तनुत्वचः ॥"

विस्मयः, पुं, ( वि + स्मि + "एरच् ।" इत्यच् । ) आश्चर्य्यम् । तत्पर्य्यायः । अहो २ ही ३ । इत्यमरः ॥ "अन्यदद्भुतशब्दे द्रष्टव्यम् ।
'अद्भुतो विस्मयस्थायिभावो गन्धर्व्वदैवतः ।
पीतवर्णो वस्तु लोकातिगमालम्बनं मतम् ॥'
इति भावरसयोः पर्य्यायत्वं अद्भुतस्य विस्मयस्थायिभावात्मकत्वात् ।" इति भरतः ॥ * ॥ तस्य लक्षणम् । यथा,—
"विविधेषु पदार्थेषु लोकसीमातिवर्त्तिषु ।
विस्फारश्चेतसो यस्तु स विस्मय उदाहृतः ॥"
इति साहित्यदर्पणम् ॥
(अस्मात्तपःक्षयो भवति । यथा, मनुः । ४ । २३७ ।
"यज्ञोऽनृतेन क्षरति तपः क्षरति विस्मयात् ॥")
दर्पः । इति मेदिनी ॥ सन्देहः । इति शब्दरत्नावली ॥ ( विगतः स्मयो गर्व्वो यस्येति । नष्टगर्व्वे, त्रि । यथा, भागवते । ३ । १७ । ३० ।
"तं वीरमारादभिपद्य विस्मयः
शयिष्यसे वीरशये श्वभिर्वृतः ॥")

विस्मयान्वितः, त्रि, ( विस्मयेन अन्वितः युक्तः । ) विस्मययुक्तः । आश्चर्य्यविशिष्टः । तत्पर्य्यायः । विलक्षः २ । इत्यमरः ॥

विस्माप(य)नः, पुं, ( विस्माप(य)यतीति । वि + स्मि + णिच् + ल्युः ।) कुहकः । गन्धर्व्वनगरम् । कामदेवः । इति मेदिनी ॥ क्ली, विस्मापनम् ॥ ( यथा, हरिवंशे । १२६ । २६ ।
"पारिजाततरोः पुष्पं तस्य दत्तं मयानघ ।
विस्मापनार्थं देवेश पत्नीनां सुरतेजसः ॥"
विस्मयकारके, त्रि । यथा, भागवते । १ । १५ । ५ ।
"वञ्चितोऽहं महाराज हरिणा बन्धुरूपिणा ।
येन मेऽपहृतं तेजो देवविस्मापनं महत् ॥")

विस्मितः, त्रि, (वि + स्मि + क्तः ।) विस्मयान्वितः । यथा,—
"महापाशुपतान् दृष्ट्वा समुत्थाय महेश्वरः ।
संपरिष्वजत व्यक्तं ते प्रणेमुर्म्महेश्वरम् ॥
ततस्तदद्भुततमं दृष्ट्वा सर्व्वगणेश्वराः ।
सुविस्मितास्तदा सन्तः किमिदं चिन्तयन्निति ॥
विस्मितांस्तान् गणान् दृष्ट्वा शैलादिर्योगिनांवरः ।
प्राह प्रहस्य देवेशं शूलपाणिं गणाधिपः ॥
विस्मितामी गणा देव सर्व्व एव महेश्वर ।
महापाशुपतानां हि यत् त्वयालिङ्गनं कृतम् ॥"
इति वामने ६४ अध्यायः ॥

विस्मितिः, स्त्री, विस्मरणम् । विपूर्व्वस्मिधातोर्भावे क्तिन्प्रत्ययेन निष्पन्नमिदम् ॥

विस्मृतः, त्रि, (वि + स्मृ + क्तः ।) स्मरणाविषयः । तत्पर्य्यायः । अन्तर्गतम् २ । इत्यमरः ॥ (यथा,
"पठित्वा सर्व्वशास्त्राणि विस्मृतान्यक्षराणि च ।
आस्ते किञ्चित् मम स्वान्ते टवर्गस्य तु पञ्चमः ॥"
इत्युद्भटः ।)

विस्मृतिः, स्त्री, विस्मरणम् । विपूर्व्वकस्मृधातोः क्तिन् प्रत्ययेन निष्पन्नमिदम् ॥ ( यथा, कथासरित्सागरे । ४४ । ६६ ।
"जामातरञ्च स तथा सूर्य्यप्रभमुपाचरत् ।
यथा तस्य निजा भोगाः सर्व्वे विस्मृतिमाययुः ॥" )

विस्रं, क्ली, आमगन्धः । इत्यमरः ॥ इदं चिताधूमादिगन्धे अपक्वमांसगन्धे इत्यन्ये । इति भरतः ॥ (यथा, कथासरित्सागरे । ७४ । १६६ ।
"समाश्लिषच्च धावित्वा सिञ्चन् धरास्त्रुभिः स तम् ।
मीनोदरदरीवासविस्रं प्रक्षालयन्निव ॥"
तद्विशिष्टे, त्रि । यथा, कथासरित्सागरे । ८२ । ७ ।
"अहमेनं न शक्नोमि ग्रहीतुं विस्रपिच्छलम् ॥")

विस्रगन्धा, स्त्री, ( विस्रं गन्धो यस्याः । ) हपुषा । इति राजनिर्घण्टः ॥

विस्रगन्धिः, पुं, ( विस्रमिव गन्धो यस्य । ) हरितालम् । इति हेमचन्द्रः ॥

विस्रब्धः, त्रि, ( वि + स्रन्भ + क्तः । ) विश्रब्धः । इति केचित् ॥ ( यथा, साहित्यदर्पणे । १ । ७ ।
"विस्रब्धं परिचुम्ब्य जातपुलकामालोक्य गण्डस्थलीम् ॥" )

विस्रम्भः, पुं, ( वि + स्रन्भ + घञ् । ) विश्वासः । ( यथा, उत्तरचरिते । १ ।
"विस्रम्भादुरसि निपत्य लब्धनिद्राम् ॥" )
प्रणयः । इत्यमरः ॥ प्रणयः परिचयः शृङ्गारप्रार्थना वा ।
"परिचयप्रार्थनयोः प्रणयः परिकीर्त्तितः ॥"
इत्यमरमाला ॥
प्रणयः क्रीड़ापारतन्त्र्यम् । इति रमानाथः ।" इति तट्टीकायां भरतः ॥ ( यथा, रामायणे । २ । ६० । ७ ।
"विजनेऽपि वने सीता वासं प्राप्य गृहेष्विव ।
विस्रम्भं लभतेऽभीता रामे विन्यस्तमानसा ॥")
केलिकलहः । वधः । इति हेमचन्द्रः ॥

विस्रम्भी, [ न् ] त्रि, ( विस्रम्भते विश्वसितीति । वि + स्रम्भ + "वौ कषलसकत्थस्रम्भः ।" ३ । २ । १४३ । इति घिनुण् । ) विश्वासी । ( यथा, भागवते । ६ । ५ । २० ।
"कथं तदनुरूपाय गुणविस्रम्भ्युपक्रमेत् ॥")
प्रणयी । विस्रम्भशब्दादस्त्यर्थे इनिप्रत्ययेन निष्पन्नमिदम् ॥

विस्रसा, स्त्री, जरा । इत्यमरः ॥

विस्रा, स्त्री, ( विस्रं गन्धोऽस्त्यस्या इति । अच् ततष्टाप् । ) हपुषा । इति राजनिर्घण्टः ॥

विस्रुतः, त्रि, ( वि + स्रु + क्तः । ) विस्तृतः । विपूर्व्वकस्रुधातोः क्तप्रत्ययेन निष्पन्नमिदम् ।

विहगः, पुं, (विहायसा गच्छतीति । गम् + "प्रियवशेति ।" ३ । २ । ३८ । इत्यत्र "डेच विहायसो विहादेशो वक्तव्यः ।" इति काशिकोक्तेः डप्रत्यये विहायःशब्दस्य विहादेशः । ) पक्षी । इत्यमरः ॥ ( यथा, भागवते । ४ । १८ । २४ ।
"सुपर्णवत्सा विहगाश्चरञ्चाचरमेव च ॥")
बाणः । ( यथा, महाभारते । ७ । १६१ । ४० ।